# Bharatam Jayatachchiram

# भारतं जयताच्चिरम्

## Document Information

Text title : Bharatam Jayatachchiram

File name : bhArataMjayatAchchiram.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : vijayan vi. paTTAmbI

Acknowledge-Permission: Vijayan V. Pattambi

Latest update : August 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2024

*sanskritdocuments.org*

# भारतं जयताच्चिरम्

सर्वदेशेषु सम्बुद्धं
सर्वलोकेषु विश्रुतम् ।
सर्वलोकसमाराध्यं
भारतं जयताच्चिरम् ॥ १॥

स्वरुचिं साधु संवर्ध्य
साधुभावं प्रकाश्य च ।
स्वान्तं शान्तिसंयुक्तं
भारतं जयताच्चिरम् ॥ २॥

स्वायत्तं वर्धितं वीर्यं
स्वायत्तं जनमण्डलम् ।
स्वरभेदं विना चैत-
द्भारतं जयताच्चिरम् ॥ ३॥

योगविद्यां प्रसार्यात्र
सर्वलोकेषु च पुनः ।
सर्वचित्तानि संयम्य
भारतं जयताच्चिरम् ॥ ४॥

स्वायत्तीकृत्य तन्त्राणि
संलक्ष्य शत्रुविक्रमान् ।
संसेव्य रणतन्त्राणि
भारतं जयताच्चिरम् ॥ ५॥

संलक्ष्य साधु व्याधिघ्ना-
नौषधानपि सत्वरम् ।
निहत्य व्याधिजालं त-
द्भारतं जयताच्चिरम् ॥ ६॥

संसेव्य संस्कृतं नित्यं
सर्वलोकोपकारकम् ।
सर्वान् ज्ञानेन सत्कृत्य
भारतं जयताच्चिरम् ॥ ७॥

स्वाधीनस्य सुखञ्चान्य-
दन्यैषा चात्मनिर्वृतिः ।
स्वाधीनं सर्वतोभद्रं
भारतं जयताच्चिरम् ॥ ८॥

— विजयन् वि. पट्टाम्बि

*Bharatam Jayatachchiram*

pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*